# Vedic Chanting

(i) ॐ गणानां त्वा गणपतिꣳहवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनःशृण्वन्नूतिभिःस्सीदसादनम् ॥
ॐ महागणपतये नमः ॥

Om gaṇānāṁ tvā gaṇapatiṁhavāmahe kaviṁ
kavīnāmupamaśravastamam ।
jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata
ānaḥśṛṇvannūtibhiḥssīdasādanam ।।
om mahāgaṇapataye namaḥ ।।

(ii) ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय
त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय
श्रीमन्महादेवाय नमः ॥

Om namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya
tripurāntakāya trikālāgnikālāya kālāgnirudrāya nīlakaṇṭhāya
mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ।।

(iii) ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

Om tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam ।
urvārukamiva bandhanānmṛtyormukṣīya mā'mṛtāt ।।

## शान्तिमन्त्राः

Śāntimantrāḥ

(१) ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥

Om śaṁ no mitraḥ śaṁ varuṇaḥ | śaṁ no bhavatvaryamā | śaṁ na indro bṛhaspatiḥ | saṁ no viṣṇururukramaḥ | namo brahmaṇe | namaste vāyo | tvameva pratyakṣaṁ brahmāsi | tvāmeva pratyakṣaṁ brahma vadiṣyāmi | ṛtaṁ vadiṣyāmi | satyaṁ vadiṣyāmi | tanmāmavatu | tadvaktāramavatu | avatu mām | avatu vaktāram || om śāntiḥ śāntiḥ śāntiḥ ||

(२) ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यङ्करवावहै।
तेजस्वि नावधीतमस्तु मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः ॥

Om saha nāvavatu saha nau bhunaktu saha vīryaṅ karavāvahai | tejasvi nāvadhītamastu mā vidviṣāvahai |om śāntiḥ śāntiḥ śāntiḥ ||

(३) ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। ॐ शान्तिः शान्तिः शान्तिः ॥

Om yaśchandasāmṛṣabho viśvarūpaḥ | chandobhyo'dhyamṛtāt sambabhūva | sa mendro medhayā spṛṇotu | amṛtasya deva dhārano bhūyāsam | śarīraṁ me vicarṣaṇam | jihvā me madhumattamā | karṇā bhyāṁ bhūri viśruvam | brahmaṇaḥ kośo 'si medhayā pihitaḥ | śrutaṁ me gopāya | om śāntiḥ śāntiḥ śāntiḥ ||

(४) ॐ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणꣳ सवर्चसम्। सुमेधा अमृतोऽक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्। ॐ शान्तिः शान्तिः शान्तिः ॥

Om ahaṁ vṛkṣasya rerivā | kīrtiḥ pṛṣṭhaṁ gireriva | ūrdhvapavitro vājinīva svamṛtamasmi | dravinaṁ̐ savarcasam | sumedhā amṛto'kṣitaḥ | iti triśaṅkorvedānuvacanam |
om śāntiḥ śāntiḥ śāntiḥ ||

(५) ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्च्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्तिः शान्तिः शान्तिः ॥

Om pūrṇamadaḥ pūrṇamidaṁ pūrṇāt pūrṇamudacyate |

pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate |

om śāntiḥ śāntiḥ śāntiḥ ||

(६) ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्म निराकुर्याम् । मा मा ब्रह्म निराकरोत् । अनिराकरणमस्त्वनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु । ते मयि सन्तु । ॐ शान्तिः शान्तिः शान्तिः ॥

Om āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrotramatho
balamindriyāṇi ca sarvāṇi | sarvaṁ brahmaupaniṣadam | māhaṁ
brahma nirākuryām | mā mā brahma nirākarot |
anirākaraṇamastvanirākaraṇaṁ me astu | tadātmani nirate ya
upaniṣatsu dharmāste mayi santu | te mayi santu |
om śāntiḥ śāntiḥ śāntiḥ ||

(७) ॐ वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम्। आविरावीर्म एधि। वेदस्य म आणीस्थः। श्रुतं मे मा प्रहासीः। अनेनाधीतेन। अहोरात्रान् सन्दधामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु । तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारमवतु वक्तारम्। ॐ शान्तिः शान्तिः शान्तिः ॥

Om vāṅme manasi pratiṣṭhitā | mano me vāci pratiṣṭhitam | āvirāvīrma edhi | vedasya ma āṇīsthaḥ | śrutaṁ me mā prahāsīḥ | anenādhītena | ahorātrān sandadhāmi | ṛtaṁ vadiṣyāmi | satyaṁ vadiṣyāmi | tanmāmavatu | tadvaktāramavatu | avatu mām | avatu vaktāramavatu vaktāram || om śāntiḥ śāntiḥ śāntiḥ ||

(८) ॐ भद्रं नो अपिवातय मनः। ॐ शान्तिः शान्तिः शान्तिः ॥

Om bhadraṁ no apivātaya manaḥ | om śāntiḥ śāntiḥ śāntiḥ ||

(९) ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ँसस्तनूभिः । व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः

Om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ | bhadraṁ paśyemākṣabhiryajatrāḥ | sthirairaṅgaistuṣṭuvāg ṁ̐ sastanūbhiḥ |

vyaśema devahitaṁ yadāyuḥ | svasti na indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ | svasti nastārkṣyo ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu || om śāntiḥ śāntiḥ śāntiḥ

(१०) ॐ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तगुँ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये । ॐ शान्तिः शान्तिः शान्तिः

Om yo brahmāṇaṁ vidadhāti pūrvaṁ yo vai vedāṁśca prahiṇoti tasmai | tagm̐ ha devamātmabuddhiprakāśaṁ mumukṣurvai śaraṇamahaṁ prapadye | om śāntiḥ śāntiḥ śāntiḥ

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥

śrutismṛtipurāṇānāmālayaṁ karuṇālayam |
namāmi bhagavatpādaṁ śaṅkaraṁ lokaśaṅkaram ||

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

śaṅkaraṁ śaṅkarācāryaṁ keśavaṁ bādarāyaṇam |
sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ ||

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

nārāyaṇaṁ padmabhuvaṁ vasiṣṭhaṁ śaktiṁ ca tatputraparāśaraṁ ca |
vyāsaṁ śukaṁ gauḍapadaṁ mahāntaṁ govindayogīndramathāsya śiṣyam ||

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

śrīśaṅkarācāryamathāsya padmapādaṁ ca hastāmalakaṁ ca śiṣyam |
taṁ toṭakaṁ vārttikakāramanyānasmadgurūn santatamānato'smi ||

…………..At the end of class…………..

अशुभानि निराचष्टे तनोति शुभसन्ततिम् ।
स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम् ॥

aśubhāni nirācaṣṭe tanoti śubhasantatim |
smṛtimātreṇa yatpuṁsāṁ brahma tanmaṅgalaṁ param ||

अतिकल्याणरूपत्वात् नित्यकल्याणसंश्रयात् ।
स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलं विदुः ॥

atikalyāṇarūpatvāt nityakalyāṇasaṁśrayāt |
smartṝṇāṁ varadatvācca brahma tanmaṅgalaṁ viduḥ ||

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

oṅkāraścāthaśabdaśca dvāvetau brahmaṇaḥ purā |
kaṇṭhaṁ bhittvā viniryātau tasmānmāṅgalikāvubhau ||

ॐ अथ
om atha

ॐ

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकन्निहितङ्गुहायाँव्विभ्राजते यद्यतयो विशन्ति ।
वेदान्तविज्ञानसुनिश्चितार्थास्सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।
दहँव्विपापम्परमेऽश्मभूतँय्यत्पुण्डरीकम्पुरमध्यसꣳस्थम् ।
तत्रापि दहङ्गगनँव्विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ।
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥
न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदँव्विभाति ॥
ॐ शान्तिः शान्तिः शान्तिः

Om na karmaṇā na prajayā dhanena tyāgenaike amṛtatvamānaśuḥ ।
pareṇa nākannihitaṅguhāryām̐vvibhrājateyadyatayo viśanti ।
vedāntavijñānasuniścitārthāssannyāsayogādyatayaśśuddhasattvāḥ ।
te brahmaloke tu parāntakāle parāmṛtātparimucyanti sarve ।
dahram̐vvipāpamparame'śmabhūtam̐yyatpuṇḍrīkampuramadhyasa m̐stham ।
tatrāpi dahraṅgaganam̐vviśokastasminyadantastadupāsitavyam ।
yo vedādau svaraḥ prokto vedānte ca pratiṣṭhitaḥ ।
tasya prakṛti līnasya yaḥ parassa maheśvaraḥ ।।

na tatra sūryo bhāti na candratāraka̠m
nemā vidyuto bhānti kuto'yama̠gniḥ |
tameva bhāntamanubhāti sa̠rva̠m
tasya bhāsā sarvamidam̐vvibhā̠ti ||
om śānti̠ḥ śānti̠ḥ śāntiḥ ||